Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 30

No. of Printed Pages – 7

SS–12–Sanskrit Sah.

यहाँ से काटिए

# उच्च माध्यमिक परीक्षा, 2018

# SENIOR SECONDARY EXAMINATION, 2018

## संस्कृत साहित्यम्

समय : 3¼ (सपाद होरात्रयम्)

पूर्णाङ्क : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्य: सामान्य निर्देशा:**

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यत: लेख्य: ।

2) सर्वे प्रश्ना: अनिवार्या: ।

3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए



Previous Pathshala

1) अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

कश्चित् कान्ता विरह गुरुणास्वाधिकारात्प्रमत्त:

शापेनास्तङ्गमित महिमा वर्षभोग्येण भर्तु: ।

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु

स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ।।

क) यक्ष: कुत्र निवसति स्म? [1]

ख) यक्ष: कियत् काल पर्यन्तम् शापित: आसीत? [1]

ग) "स्निग्धच्छायातरूषु–" इत्यत्र विशेषण–विशेष्य पदं लिखत। [2]

2) अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

एकस्मिन् दिने इन्दुमती भर्तारं त्रिलोचनम् उपायं दर्शितवती, यद् अधुना वृद्धाश्रमे एव मातरं प्रापय्य निश्चिन्तताया: अनुभव: क्रियेत् । अनेन तत्र स्वसमवयस्काभि: सह माता अपि सुखिनी स्थास्यति, वयम् अपि इह दु:खोन्मुक्ता: भविष्याम: । त्रिलोचन: इन्दुमत्या: प्रस्तावेन तत्कालम् एव सहमत: अजायत । अवसरं दृष्टवा स: मातरं तदर्थम् अनुकूलाम् अपि कृतवान् ।

क) इन्दुमती त्रिलोचनं किमुपायं दर्शितवती? [1]

ख) अवसरं दृष्ट्वा त्रिलोचन: किं कृतवान्? [1]

ग) 'वयमपि इह दु:खोन्मुक्ता:' इत्यत्र 'वयं' सर्वनामस्थाने संज्ञापदं लिखत। [2]

3) अधोलिखितं नाट्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

मैत्रेय: एष चार्यचारूदत्तस्य प्रियवयस्येन जूर्णवृद्धेन जातीकुसुमवासित: प्रावारकोऽनुप्रेषित: सिद्धिकृतदेवकार्यस्यार्य–

चारूदत्तस्योपनेतव्य इति । तद्यावदार्यचारूदत्तं पश्यामि । एष चारूदत्त: सिद्धिकृतदेवकार्यो गृहदेवतानां बलि हरन्नित एवागच्छति ।



Previous Pathshala

विदूषक: (उपसृत्य) एष आर्य चारूदत्त: । तद्यावत् साम्प्रतमुपसर्पामि । (उपसृत्य) स्वस्ति भवते। वर्धतां भवान् ।

चारूदत्त: सर्वकाल मित्रं मैत्रेय प्राप्त: सखे स्वागत । आस्यताम् ।

क) चारूदत्तस्य कृते प्रावारक: केन प्रेषित? [1]

ख) मैत्रेय: चारूदत्तस्य कीदृश: मित्रम् आसीत्? [1]

ग) मैत्रेय: चारूदत्तं समीपं केन प्रयोजनेन गच्छति? [2]

4) रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरूत –

क) इन्दुमती राज्यसर्वकारेण सम्मानिता । [1]

ख) मानवा: सर्वत्र विजयं कामयन्ते । [1]

ग) मातृवन्दना मधुर स्वरेण गीयताम् । [1]

5) निम्नलिखितयो: वाक्ययो: भावार्थं हिन्द्यां संस्कृते वा लिखत–

क) सङ्घेशक्ति: कलौ युगे । [2]

ख) समशक्ति पराक्रमै: । [2]

6) अधोलिखितस्य श्लोकस्य अन्वयसहितं सरलम् अर्थं हिन्द्यां संस्कृते वा लिखत – [3]

बुद्धया विचिन्तयामास वीरा: केन निपातिता: ।
गाहमानश्च तत् तोयमन्तरिक्षात् स शुश्रुवे ।।

7) निम्नलिखितयो: शब्दयो: हिन्दीभाषायाम् आङ्ग्लभाषायां वा अर्थं लिखत –

क) असकृत् [1]

ख) वयस्य [1]

8) 'विरला: हि तेषामुपदेष्टार:' 'इत्यत्र' तेषां सर्वनामस्थाने संज्ञापदं लिखत । [1]

9) 'रमन्ते तत्र देवता:' इत्यत्र कर्तृपदं लिखत । [1]

10) ''पीतप्रतिबद्धवत्सां तां धेनुं....'' अत्र विशेष्यपदं लिखत । [1]

11) ''पैशुन्यमुच्यते किंतत्'' इत्यत्र 'पैशुन्यं' पदस्य पर्यायपदं लिखत । [1]



Previous Pathshala

12) "वस्तुत: सङ्घटने एव शक्तिनिवास:" इत्यत्र रेखाङ्कितपदस्य विलोमपदं लिखत। [1]

13) "नहि, नहि, हिरण्यमयी सीताप्रतिकृति:" इति क: कं प्रति कथयति? [1]

14) वेदानां रचनाकाल विषये केषां त्रिविदुषां मतं संक्षेपेण लिखत। [3]

15) कस्य नाटकस्य कथानक: 'स्वप्नवासवदत्तम्' इत्यस्य पूर्वभाग: विद्यते? कति अङ्केषु विभक्तमिदं नाटकम्? [2]

16) कस्य गद्यकाव्यस्य उत्तरार्द्धभाग: भूषणभट्टेन पूरिता? अस्य पूर्वभाग: केन लिखिता? [2]

17) निम्नलिखित प्रश्नानां संक्षिप्तम् उत्तरं लिखत –

क) "जयपुर विलास:" केन कविना सुरचितं रमणीयं खण्डकाव्यम् अस्ति? [1]

ख) भास्कराचार्यस्य 'सिद्धान्त–शिरोमणौ' गणिताध्यायं आधारीकृत्य छात्राणांकृते ग्रह गणित सिद्धान्तानां विवेचनं केन कृतम्? [1]

ग) 'आदर्श–दम्पत्ती' इति उपन्यासस्य लेखक: क:? [1]

18) अधोलिखितेषु कस्यापि एकस्य छन्दस: लक्षणोदाहरणे लिखत– [3]

क) इन्द्रवज्रा

ख) भुजङ्गप्रयातम्

ग) शार्दुलविक्रीडितम्

19) निम्नलिखित–कस्यापि एकस्या: पंक्त्या: गणचिन्हं प्रदर्शयन् छन्दस: नामोल्लेखं कुरूत – [2]

क) नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।

ख) मम विरहजांन त्वं वत्से शुचं गणयिष्यसि।

20) अधोलिखितेषु कस्यापि एकस्य अलङ्कारस्य लक्षणोदाहरणे लिखत – [3]

क) यमकम्

ख) उपमा

ग) अर्थान्तरन्यास:



Previous Pathshala

21) निम्नलिखितेषु कस्यामपि एकस्यां पंक्त्यां प्रयुक्त–अलङ्कारस्य नामोल्लेखपूर्वकं लक्षणं लिखत – [2]

क) वधाय वध्यस्य शरं शरण्य: ।

ख) न पतिष्यत: कर सहस्रमपि ।

22) अधोलिखितं अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

अस्ति मगधदेशे अतीव सुन्दर:, मनोहर:, रमणीय: जलाशय:। तस्य तोये सुरभीणि कमलानि आसन् । तत्र तड़ागे हंसौ अवसताम् । कम्बुग्रीवो नाम कूर्म: तयो: मित्र मासीत् । एकदा केचिद् धीवरास्तत्रागत्य श्वो जलचराणां ग्रहणाय निश्चयमकुर्वन् । तेषां निश्चयं ज्ञात्वा कूर्मस्य नयनाभ्याम् अश्रूणि अगलन् । हंसौतम् उपायमेकं बोधितवन्तौ ।

क) कम्बुग्रीव: कयो: मित्रमासीत्? (एकपदेन उत्तरम्) [1]

ख) धीवरा: किं निश्चयमकुर्वन्? (पूर्णवाक्येन उत्तरम्) [1]

ग) ''सुरभीणि कमलानि'' इत्यत्र विशेषणं विशेष्यपदं किम्? [1]

घ) ''नयनाभ्याम् अश्रूणि अगलन्–'' अत्र कर्तृपदं किम्? [1]

23) अधोलिखितं अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत –

अस्माकं भारतवर्षे नारीणां स्थानम् अतिमहत्त्वपूर्णं वर्तते । यदा–यदा पुरूषशक्ति: पराजिता भवति, तदा–तदा नारीशक्ति: सुसंघटिता भूत्वा मानवसमाजं विपद्भ्य: रक्षति। नार्या: योगदानेन एव समाज: सुसंस्कृत: दृश्यते । दया–क्षमा–ममता–त्याग–सहानुभूति इत्यादय: गुणा: नार्यां स्वाभाविकरूपेण वर्तन्ते । स्वतन्त्रतासंग्रामे अपि नारीणां योगदानं सर्वे जानन्ति । समाजस्य प्रगति: नारीप्रगत्याधीना वर्तते । अतएवोक्तम् – यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता: ।

क) भारतवर्षे केषां स्थानम् महत्त्वपूर्णं वर्तते? (एकपदेन उत्तरम्) [1]

ख) नार्यां कीदृशा: गुणा: स्वाभाविकरूपेण वर्तन्ते? (पूर्णवाक्येन उत्तरम्) [1]

ग) नारीशक्ति: विपद्भ्य: रक्षति.. इत्यत्र 'रक्षति' क्रियाया: कर्ता क:? [1]

घ) गद्यांशस्य समुचितं शीर्षकं लिखत । [1]



Previous Pathshala

24) प्रदत्त–शब्दानां प्रयोगं कुर्वन् एकम् अनुच्छेदं लिखत – [5]

मम ग्रामः ग्रामस्य नाम, समीपे, कृषकाः, उत्पादयन्ति, ग्रामस्य जलवायुः, वृक्षाः उपवनानिच, जीवनमतिसरलं, एका पाठशाला, आदर्शग्रामः ।

अथवा

क्रमरहितानि वाक्यानि समुचित–क्रमानुसारं लिखत –

क) तस्य चत्वारः पुत्रा आसन् ।

ख) तत्र प्राचीनकाले नृपः दशरथः राज्यमकरोत् ।

ग) ऋषिः विश्वामित्रः शस्त्रविद्यां शिक्षेतुं रामलक्ष्मणौ स्वस्य आश्रमम् अनयत् ।

घ) तस्याः नाम सीता आसीत् ।

ङ) मिथिलानृपः स्वज्येष्ठां सुतां रामाय अयच्छत् ।

च) ततः मिथिलायां चतुर्णामपि राजपुत्राणां विवाहोऽभवत् ।

छ) अस्माकं देशस्य उत्तरप्रदेशे प्राचीना अयोध्यानगरी अस्ति ।

ज) तेन सह सीता लक्ष्मणश्च अपि अगच्छताम् ।

झ) तत्र वने रावणः सीतां कपटेन अहरत् ।

ञ) पितुरादेशात् राज्यं त्यक्त्वा रामः वनमगच्छत् ।

25) निम्नलिखितेषु वाक्येषु केषाञ्चित् पञ्चवाक्यानां संस्कृतभाषायाम् अनुवादं कुरूत – [5]

क) आप यहाँ कब आते हैं?

ख) तुम सब कहाँ खेलते हो?

ग) पुस्तक लाने के लिए घर जाओ ।

घ) तुम्हारा मित्र यहाँ कब आयेगा?

ङ) हमें यहाँ नहीं रहना चाहिए ।

च) छात्र शिक्षक से व्याकरण पढ़ता है ।

छ) वह कल कहाँ गया था?

ज) यह किसकी पुस्तक है?



Previous Pathshala

26) अधोलिखित–पदानां सूत्रोल्लेखपूर्वकं सन्धि–विच्छेदं कुरूत – [2]

क) महौषधिः

ख) प्रौढिः

27) अधोलिखित–पदानां सूत्रोल्लेखपूर्वकं सन्धिंकुरूत – [2]

क) हित + उपदेशः

ख) विष्णो + अव

28) निम्नलिखितेषु रेखाङ्कितपदेषु प्रयुक्त–विभक्तेः नामोल्लेखं कृत्वा तस्य सूत्रं चापि लिखत –

क) सायंकाले जनाः ग्रामं प्रति गच्छन्ति । [1]

ख) बालकः पुष्पाय स्पृहयति । [1]

ग) कामात् क्रोधः जायते । [1]

घ) छात्रेषु मैत्रेयः पटुः । [1]

29) अधोलिखित–पदयोः प्रयुक्त समासस्य नामोल्लेखपूर्वकं विग्रहं कुरूत – [2]

क) धर्मार्थौ

ख) पीताम्बरः

30) अधोलिखित– विग्रहवाक्ययोः समासं कृत्वा समासस्य नामोल्लेखमपि कुरूत – [2]

क) जनानाम् अभावः इति ।

ख) कुत्सितः पुत्रः इति ।

⊖⊖⊖



Previous Pathshala